काति २८

कल्याद्र रहस्यसंग्रहः

१२ ३१

२

व॰ १

इदं पुस्तकं रामचन्द्रपाठकस्य

कणादरहस्यसंग्रहे साधर्म्यनिरूपणम्

४८६

श्री० १

श्रीगणेशाय नमः पदार्थानां तत्त्वज्ञानं निःश्रेयसहेतुः पदार्था अपि द्विविधः भावोऽभावश्च भावाः षडेव द्रव्यगुणकर्म
सामान्यविशेषसमवायभेदात् एवकारार्थश्चाव्यापकत्वं तच्चानुसन्निवेशलासरार्थैकदेशेश्वप्यच्चेति । न चाभा
वत्वव्यापकीभूतषडन्यतमत्वं चेतो द्रव्यादिपदार्थः सर्वः । षडन्यतमत्वे च तथाभूतविभाजकोपाधिमत्वं ॥ तत्र द्रव्य
त्वजातिमद्द्रव्यं समवायिकारणं ॥ गुणाश्रयः । परिमाणवत् । पृथक्त्ववत् । संख्यावत् । संयोगवत् । एकत्व
वत् ॥ असमवेतसमवेतसत्ताव्याप्यजातिमत् ॥ मनोवृत्तिसत्त्वसत्तासाक्षाद्व्याप्यजातिमत् ॥ आकाशावृ
त्तिसत्ताव्याप्यजातिमत् । आकाशावृत्तित्वे सति आकाशवृत्तिजातिमत् । रसाधिकरणं ॥ समवायिकारण
तावच्छेदकतयाद्रव्यत्वजातिसिद्धं तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ॥ त
त्र पृथिवीत्ववती पृथिवी । गंधसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिसिद्धेः । गंधसमानाधि राम १
करणगंधासमानाधिकरणगुणासमानाधिकरणजातिमत्त्वं वा नीलसमानाधिकरणद्रव्यत्वसा

प्यज्ञातिमतीवागंधवत्त्वादिस्थानेतिकारिपदप्रक्षेपेणालक्षणंतरागपिद्रव्याणि।साचरूपरसगंधस्पर्शसंख्यापरिमा
णपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वगुरुत्वसंस्कारवती।तत्रद्रवत्वपर्यंताः प्रत्यक्षसिद्धाः।गुरुत्वंतुपतना
नुमेयं।अधःसंयोगावच्छेदेननष्टेपिप्रत्यक्षमितिवल्लभाचार्याः।संस्कारश्च त्रिवेगः।स्थितिस्थापकश्च।तत्रवेगः
प्रत्यक्षः।वेगेनगच्छतीतिप्रतीतेः।स्थितिस्थापकस्तुप्रतिनियतसंयोगविशेषानुमेयः।तत्ररूपंनीलाद्यनेकप्र
कारंपृथिव्यामेव।रसोपितिक्तकषायादिः पृथिव्यामेव।गंधोद्विविधःसुरभिरसुरभिश्च।स्पर्शस्त्वनुष्णाशी
तःपाकजश्च।एतेचावयविनिकारणगुणपूर्वकाः।परमाणौतुपाकजाः।एकत्वंपरमाणौनित्यं।अन्यत्र
कारणगुणपूर्वकं।द्वित्वादिकंसर्वत्रापेक्षाबुद्धिजन्यं।परिमाणंतुपरमाणौनित्यं।द्व्यणुकेद्वित्वसंख्याज
न्यं।त्रसरेणौबहुत्वजन्यंमहत्वं।एतेचद्वित्वबहुत्वेऽनुमितिरूपापेक्षाबुद्धिजन्येईश्वरापेक्षाबुद्धिजन्येवा
अदृष्टनाशात्तुतन्नाशः।अन्यत्रावयविनिमहत्वेसंख्यापरिमाणप्रचयानामन्यतमेनद्वाभ्यांत्रिभिर्वाजन्य

ने२

श्री॰ तद्इति वक्ष्यते। एकत्वं स्वकारणपूर्वकं। द्वित्वादिकं त्वपेक्षाबुद्धिजन्यं। संयोगश्च विभुपरमाण्वोरन्यतरकर्मजन्य
२ एकः। विभ्वयविनोरन्यतरकर्मजः संयोगजश्च॥ परमाण्वोरन्यतरकर्मोभयकर्मजन्यः। परत्वापरत्वे कालिके दैशिके
१ च। उभे अप्यपेक्षाबुद्धिजन्ये कालिके कालपिंडसंयोगासमवायिकारणके। दैशिके दिक्पिंडसंयोगासमवा
यिकारणके द्रवत्वं तेजःसंयोगजन्यं गुरुत्वं कारणगुणपूर्वकमेव। न च तुल्यनंतत्वात् रक्षपराहो गुरुत्वाधिक्या
त्तोलने च न मनापातिः। यथा गुरूणि पाषाणाणद्वौ तुल्यौ पमानेनैतेणाद्विगुरुत्वानुभवे शोषिनाचनमने विशेषस्त
युहापोसहोषात्। अवयवावयविभावानापन्नानेकद्रव्यसमवेतगुरुत्वसमेवावनतौ कारणत्वात्। अस्याः का
र्यं शरीरेंद्रियविषयरूपं। तत्र शरीरं योनिजमयोनिजं च। इंद्रियं तु घ्राणं विषयस्तु मृत्पाषाणादि। तदस्म
निगंधानुभवे न तत्रापि गंधानुमानात्। अनुद्भूतरूपेण तेजसा तैला हावुद्भूतरूपतेजोनारंभवत्। एप
अनुद्भूतगंधैः परमाणुभिः उद्भूतगंधारंभ इति केचित्। सेयं नित्या चानित्या च। नित्या परमाणुरूपा। अनि २

१ णरूपानधिकरणानधिकरणजातिमत् । गुरुत्वसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्य जात्यधिकरण ५

णानधिकरणरू
पसमानाधिक
रणजातिमत्
गुरुत्वासमाना
धिकरणद्रव्य
त्वसमानाधि
करण ६

स्मात्वव्याप्यविरूपं ॥ अथ जलं तत्र जलत्वजातिमत् । स्नेहवत् । शीतस्पर्शवत् । निर्गंधत्वे सति रसवत् । तथात्वे स
ति गुरुत्ववत् । मधुररससमानाधिकरणतिक्तासमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत् । निसरसमा
नाधिकरणद्रव्यत्वव्याप्यजातिमद्वा इत्यायूह्यं ॥ गंधवर्जं स्नेहयुक्तं पूर्वोक्तगुणवत् । शुक्लमधुरशीतान्येव
रूपरसस्पर्शाः ॥ अपाकजा परमाणौ नित्याश्च ॥ अथ तेजः तत्र तेजस्त्वजातिमत् । रसवद्वृत्तिरूपवद्वृत्तिद्र
व्यत्वव्याप्यजातिमत् । रसस्थाने गुरुत्वं वा । गुरुत्वाधिकरणानधिकरणानधिकरणरूपवत् । अभास्वररूपा
धिकरणजातिमत् । उष्णस्पर्शानधिकरणानधिकरणजातिमद्वा । वंश्चामीकरादावव्याप्तिनुद्धृतोष्णस्प
र्शसत्वात् । रसवद्वृत्तिद्रवत्ववद्वृत्तिजातिमद्वा । भास्वररूपसमानाधिकरणभास्वररूपासमानाधिक
रणगुणासमानाधिकरणजातिमद्वा । औष्ण्यसमानाधिकरणौष्ण्यासमानाधिकरणगुणासमानाधिक
रणजातिमद्वा । तत्र रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारा एकाद

श्री॰ ३ गुणाः॥ रूपं शुक्लभास्वरं। भास्वरत्वं च पररूपप्रकाशकत्वं। पाकरूपगता जातिः॥ अथ वायुः समवेतद्रव्यस
मवेतरूपवद्समवेतजातिमान्वायुः॥ रूपासमानाधिकरणस्पर्शासमानाधिकरणविशेषगुणसमानाधि
करणजातिसाधिकरणं वा॥ रूपानधिकरणानधिकरणस्पर्शानधिकरणानधिकरणजातिसाधिकरणं वा॥ द्रवत्वा
समानाधिकरणस्पर्शसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिसाधिकरणं वा रूपासमानाधिकरणविशेष
गुणवन्मूर्तमात्रवृत्तिजातिसाधिकरणं वा॥ रूपवद्वृत्तिद्रव्यारंभकसंयोगसमानाधिकरणजातिसाधिकरणं
वेत्यादिरूह्यं। तत्र स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारान्नवगुणाः अथाका
शः॥ तल्लक्षणं च शब्दः॥ ज्ञानानधिकरणविशेषगुणाधिकरणविभुत्वं वा। एवमिच्छाप्रयत्नप्रवेशेन लक्ष
णद्वयमूह्यं सुखादिप्रवेशेतीष्वपाणामन्यतिव्याप्तेः॥ द्रव्यत्वव्याप्यजातिमूर्तत्वे सति विशेषगुणवत्त्वं वा। नि एम॰
स्पर्शभूतत्वं वा। तत्र शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः षड्गुणाः॥ अथ कालः॥ संयोगविषयापेक्षा २

वृद्धत्वजन्यपरत्वासमवायिकारणसंयोगाधिकरणविभुत्वं कालत्वं। परत्वस्थाने ऽपरत्वप्रक्षेपो वा। विभुत्वस्थाने स्था
परममहत्त्वप्रक्षेपो वा। संयोगानुत्पादकत्वे सति विशेषगुणशून्यविभुत्वं वा। क्षणादयस्तु कालोपाधयः।। त
त्र कालो नाम व्यापकः कालोपाधिः क्षणः। स्वाधेयकार्यवृत्ति[illegible]भावप्रतियोगिपदार्थः कालोपाधिर्वा उ
पाधिस्तु गुणप्रागभावावच्छिन्नं ध्वंसं। ध्वंसप्रागभावयोरनेककालवृत्तित्वेपि तत्तद्व्यक्तिवैशिष्ट्यं क्षणव्यवहा
रविषयः। एवं वर्त्तमानत्वादयोप्युपाधयः।। घटस्य हि प्रागभावावच्छिन्नो भविष्यत्कालः। स्वावच्छिन्नो वर्त्तमा
नकालः। ध्वंसावच्छिन्नो भूतकालः। संख्यापरिमाणपृथक्त्वसंयोगविभागास्तद्गुणाः।। अथ दिक्।।
सं दिग्विषयकापेक्षाबुद्धिजन्यपरत्वासमवायिकारणसंयोगाधिकरणत्वे सति विशेषगुणसमाना
धिकरणमहत्त्वाश्रयत्वं दिक्त्वं। सत्यन्तविशिष्टविभुत्वं वा। संयोगविषयकापेक्षाबुद्धिजन्येति वापरत्वविशे
षणं। एवमपरत्वप्रक्षेपेण। मूर्त्तत्वं विशेषगुणशून्यत्वे सति क्रियानुत्पादकनिष्क्रियपदस्थत्वं वा। सत्त

श्री० विशिष्टसंयोगोपनायकत्वं वा। निष्क्रियत्वस्थाने वेगराहित्यं संस्कारराहित्यं परत्वराहित्यं अपरत्वराहित्यं वेत्यादिवोध्यं
४ मात्रादिव्यवहारानुपपत्त्याचरितार्थसिद्धिः। गुणास्त्वेकादश वा। अथात्मा तत्रज्ञानानधिकरणानधिकर
५ णमात्मेति मानात्मा। ज्ञानस्थाने इच्छाप्रयत्नपक्षे पीयो वा। स्पर्शाधिकरणानधिकरणविशेषगुणसमानाधिकरण
जातिमान्। मूर्त्तत्वाधिकरणद्रव्यत्वव्याप्यजातिमान्। सुखसमानाधिकरणद्रव्यत्वव्याप्यजातिमान्। ए
वं दुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनादिपक्षेऽपि ज्ञेयम्। अस्य गुणाः संख्यादयः पंच। बुद्ध्यादयो न
व सर्वे चतुर्दश क्षेत्रज्ञनिष्ठाः। ईश्वरे त्वष्टौ ज्ञानेच्छाप्रयत्नैः सहिताः संख्यादयः। जीवे एकत्वपरिमाणस
त्पृथक्त्वे इति केचित्। जातमात्रस्य बालस्यास्मिन्कंपनादिनैरनुमितानां हर्षभयशोकानां पूर्वजन्मानुभूतवि
षयकस्मृतिं विनाऽनुपपत्तेरनादिरयं। तथा च पारमर्षं सूत्रं। पूर्वाभ्यस्तस्मृत्यनुबंधाज्जातस्य हर्षभय राम०
शोकसंप्रतिपत्तेरिति अथ मनः निस्पर्शत्वे सति मूर्त्तं मनः। विशेषगुणशून्यत्वे सति द्रव्यत्वव्याप्य ४

जातिमत्ताद्रव्यानारंभकारणमहत्वासमानाधिकरणद्रव्यत्वव्याप्यजातिमत्ताविशेषगुणासमानाधिकरणमिति
वा। विशेषगुणवद्वृत्तिसंस्कारवद्वृत्तिजातिमत्ता। संस्कारस्थानेपरत्वापरत्वक्रियावेगाद्रिप्रक्षेपो वा॥ स
र्ववद्वृत्तिद्रव्यत्वव्याप्यानींद्रियजातिमत्ता। ज्ञानासमवायिकारणसंयोगाधारमूर्त्तं वा॥ ज्ञानस्थानेइच्छा
द्रिप्रक्षेपो वा। विशेषगुणानधिकरणेंद्रियं वा। संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगा
ख्यगुणा॥ इति कणादशास्त्रे संग्रहे द्रव्यपदार्थः॥ अथ गुणाः॥ तत्र नित्यवृत्तिनित्यवृत्तिसत्तासाक्षाद्व्या
प्यजातिर्गुणत्वं। विभुवृत्तिवृत्तिसत्तासाक्षाद्व्याप्यजातिर्वा। ते च रूपरसगंधस्पर्शसंख्यापरिमाणपृ
थक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः कंठोक्ताः सप्तदश। चकारसमुच्चिता
श्च गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः सप्तेति चतुर्विंशतिः। तत्र रूपत्वसामान्यवत्त्वं रूपं। तच्च शु
क्लाद्यनेकप्रकारं॥ पृथिव्यादित्रिकवृत्ति। पार्थिवपरमाणुष्वग्निसंयोगादुत्पद्यते नश्यति च॥ सलिलतेज

श्री० सोऽपरमाणुषु नित्यं। अवयविषु कारणगुणासमवायिकारणकं। चित्रं तु नीलादिविजातीयमेव तत्कारणताव
५ च्छेदकं तु शुक्लेतरेतररूपत्वं। एवं नीलत्वासमवायिकारणतावच्छेदकं नीलेतरेतरत्वाद्यपि। एवं च इदं ज्ञत्वं च क्तत्वादिव
६ त्कारणतावच्छेदकानि। एवं च शुक्लनीलाभ्यां चित्राभ्यां च चित्रारंभोपपत्तिः। शुक्लशुक्लतराभ्यां च विषमरूपशुद्
ते रूपे वच्चास्तु यक्षाने हेतुः। घटादिरूपहेतत्समवेते। न विष्णसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रव
त्वस्नेहवेगानां कर्मणः समानानां च रूपैकार्थसमवायादूहः। परिमाणत्वादीनां तु रूपैकार्थसमवेतसमवा
यात्। रूपत्वादीनां तु रूपसमवायादित्साघूत्ये। एवं च रूपमालोकरूपं च सहकारि। तदुक्तं। स्वकीये न
हि रूपेणालोकच सुखीद्र्यंप्रकाशमयनश्यति। सगुणानामिंद्रियभाव इति च। सगुणानां। गुणसहकृतानां
स्पर्शरसः॥ रसनेंद्रियजन्यलौकिकप्रत्यक्षविषयगुणत्वव्याप्यजातिमान्रसः। तेजोरसवन्निष्टपृथिवीवृ राम
त्तिर्मधुरश्च गुणत्वव्याप्यजातिमान्वा गुरुत्वानधिकरणानधिकरणगुणवृत्तिमधुरगुणत्वव्याप्यजातिमान्वा ५

पत्र निवृत्ति

मधुराद्यनेकप्रकारः अथ गंधः घ्राणेंद्रियजन्यलौकिकप्रत्यक्षविषयगुणत्वव्याप्यजातिमान् ॥ रसवर्जेंद्रियजन्यसाक्षा
त्कारविषयनित्यावृत्तिजातिमान्वा ॥ स्पर्शवर्जितेंद्रियग्राह्यविशेषगुणावृत्तिनित्यावृत्तिजातिमान्वा ॥ स्पर्शस्थाने रूपप्र
क्षेपो वा ॥ अपेक्षानित्य एव ॥ अथ स्पर्शः ॥ रूपव्यापकविशेषगुणः स्पर्शः ॥ नीरूपावयवीद्रियग्राह्यविशेषगुणा
५ स्मानु ५ वृत्तिस्नेहइववृत्तिजातिमान् ॥ त्वगिंद्रियमात्रकरणकसाक्षात्कारकविषयविशेषगुणवृत्तिस्नेहइववृत्तावृ
त्तिजातिमान्वा ॥ स त्रिविधः ॥ शीतोष्णाशीतभेदात् ॥ पार्थिवपरमाणुषु पाकजः ॥ पाकनाश्यश्च ॥ अप्तेजोवायुप
रमाणुषु नित्यः ॥ अवयविषु कारणगुणपूर्वकः ॥ आश्रयनाश्यनाश्यः ॥ रूपादिषु चतुर्षु प्रत्यक्षप्रमाणं ॥ अ
तींद्रियरूपादौ च कार्यरूपादिकं प्रमाणमिति दिक् ॥ अथ पाकजप्रक्रिया ॥ तत्र विप्रतिपन्नः पार्थिवावय
विरूपरसगंधस्पर्शाः अग्निसंयोगजन्या न वा ॥ घटोऽग्निसंयोगासमवायिकारणकरूपवान्न वा ॥ अग्निसंयोगोऽय
टसमवेतरूपादिजनको न वा ॥ घटत्वमग्निसंयोगजन्यरूपसमानाधिकरणं न वेति ॥ तत्र विधिकोटिर्नैयायिकानां

श्री० ६

तेषामप्यपायः। अपाकनिक्षिप्तानां घटादीनां पूर्वरूपादिविजातीयरूपाद्युपलभ्यते। तत्र पाकस्यैवान्वयव्यतिरेकौ दृश्येते
न च घटादीनामवयवानामेवं तद्विभागेन द्व्यणुकपर्यन्तावयविनाशे स्वतन्त्राः परमाणवः पच्यन्ते॥ ततो द्व्यणुकादिक्रमेण घ
टादिषूत्पन्नेषु कारणगुणप्रक्रमेण रूपाद्युत्पत्तिरिति वाच्यं॥ कल्पनागौरवप्रसङ्गात्। किं चैवमापाकादवतारिते घटे
स एवायमिति प्रत्यभिज्ञा न स्यात्। सर्वावस्थात्पाके घटदर्शनं च न स्यात्। घटोपरि मूर्धान्तरावस्थापनं च न स्यात्। भावी
न संस्थानस्य परे एवोपरे एवाद्यसंख्यापरिमाणादेश्च वैलक्षण्यं स्यात्। न त्वेवमन्तस्थानामवयवानां अग्निसंयोगा
भावात् रूपान्तरोत्पत्तिर्न स्यादिति चेन्न। अवयविनः सच्छिद्रत्वेन तदुपपत्तेः। सच्छिद्रत्वं तु अन्तर्निहितघृततैला
दिस्यन्दनेन स्ववर्णेऽप्रमाणं॥ अणुपाकानुभवे मानाः सर्वावयवावच्छेदेन कथं पाकः स्यादिति चेन्न। अन्तश्छिद्रानां
तण्डुलादीनामस्माभावदर्शनेन बहुतेजोऽनुप्रवेशोन्नयनादिति॥ प्रचोद्यते॥ प्रसाधितानन्तावत् सूचीविदलित
चमरेणुके यदा द्वावपि दर्शनानुभयसमाधेयं॥ तत्रोक्तं बहुतेजोऽनुप्रवेशात्सर्वविषयावच्छेदेन पाकइतिरिति। न राम ६

न्नद्रव्यस्यातायस्तावन्नेजोनुभवे शोप्यवयवी न नश्येत् । तेजःसंहितत्वावत्त्वयावेगवत्त्वयातीव्रतरचनोदनाभिघात
योरन्यतरसंयोगोऽवयवविश्लेषहेतुक्रियाजनक इति कथं नावयवी न नश्येत् । पाकाग्निसंयोगेनोत्तः स्थितो पलाशी
नामपिभस्मीभावस्तेन पिठरेनन्नप्रतीतिकारणसाशा । तस्मात्स्वतंत्रापरमाणावेव अतइति स्थितेनेत्वणुकविनाशमारभ्य
ककतिभिः क्षणैः पुनरन्यत द्व्यणुकमुत्पाद्य रूपादिसंपत्तिरिति ध्येयं बुद्धिवेशघापमक्रियाकथनेनानत्र च विभाग
जविभागोपैनैष्यते तन्मते । न व क्षणा ॥ तत्स्वीकर्तृमतेपि विभागः सापेक्ष एव विभागोत्तरं अन्यनेता निरपेक्षस्य
पो २४ हि जनकत्वे कर्मलापत्तिः संयोगविभागयोर्मेनपेक्षकारणं कर्मेति लक्षणात् । न च पदि इव्यारंभकसंयोगवि
नाशविशिष्टं कालमपेक्ष्य विभागेन विभागजननं तस्य हस्तक्षणां ॥ अथ पद्मा नाशाविशिष्टं कालमवपेक्ष्य
पेक्ष्य विभागेन विभागजननं तस्य एकादशक्षणात् यान्हि वह्निनाश्चोत्पादनाभिघाता द्व्यणुकारंभके परमा
णौ कर्म तेन कर्मणा परमाणोः परमाण्वंतराद्विभागः ततः आरंभकसंयोगनाशः । ततो द्व्यणुकनाशः १ ततः

श्री० केवलेपरमाणौश्यामादिनिवृत्तिः २ ततस्तत्रैवरक्ताद्युत्पत्तिः ३ अथरूपादिमतिपरमाणौ द्व्यारंभानुगुणाक्रि-
७ या ४ तयाचाकाशादिविभागः ५ ततःपूर्वसंयोगनाशः ६ ततोद्व्यणुकारंभकसंयोगः ७ ततोद्व्यणुकोत्प-
त्तिः ८ अथतत्ररूपाद्युत्पत्तिरिति द्व्यणुकनाशमारभ्यद्व्यणुकेरक्ताद्युत्पत्तिर्नवमेक्षणे ॥ परमाणुरूपादि-
नाशस्त्वग्निसंयोगान्नतु श्यामादिनिवृत्तिक्षणेरक्ताद्युत्पादक्षणेवापरमाणौ द्व्यारंभानुगुणाक्रि-
या । एवंचसप्तमेऽष्टमेवाक्षणेरक्ताद्युत्पत्तिरस्त्विति चेन्न । अग्नेरनुवृत्तेः । भिन्नेतेवापरमाणौपाककर्म ॥ नहि
नाशमंतरेणागुणोत्पत्तिमंतरेणचतत्रपरमाणौक्रियांतरानवकाशात् । कर्मवतिकर्मानुत्पत्तेः ॥ निर्गुणे
द्व्यारंभानुगुणाक्रियानुत्पत्तेश्च ॥ तथापिपरमाणौश्यामादिनिवृत्तिसमकालमेवरक्ताद्युत्पत्तिरस्त्विति
चेन्न । पूर्वरूपादिध्वंसस्यापिरूपाद्यंतरोत्पत्तौहेतुत्वात् । कारणस्यचपूर्ववर्तित्वात् । अथपरेषां क्षणाप्रक्रि- राम
या ॥ साचेयमारंभकसंयोगविनाशविशिष्टंकालमपेक्ष्यविभागेनविभागजननेसतिस्यात् । तथाहि । ७

वह्निनानोदनाद्वाभिघाताद्वा द्व्यणुकारंभके परमाणौ कर्म। तेन परमाण्वंतरविभागः ततश्चारंभकसंयोगनाशः त
तो द्व्यणुकनाशाद्विभागजपूर्वदेशविभागो १ ततः श्यामादिनाशात्पूर्वदेशसंयोगनाशो २ ततो रक्ताद्युत्पत्तिरुत्तरदेश
संयोगो ३ ततो वह्निनोदनजन्यपरमाणुकर्मणो विनाशः ४ ततस्तत्रैव परमाणावदृष्टवशात्संयोगात्द्र
व्यारंभानुगुणा क्रिया ५ ततो विभागः ६ ततः पूर्वदेशसंयोगनाशः ७ अथ द्व्यारंभकः संयोगः ८ ततो
द्व्यणुकोत्पत्तिः ९ अथ रक्ताद्युत्पत्ति १० रिति दशक्षणाः॥ अथैकादशक्षणा॥ वह्निनानोदनाद्वाभिघाताद्वा द्व
यणुकारंभकपरमाणौ कर्म। तेन परमाण्वंतरविभागः। ततो द्व्यारंभकसंयोगनाशः। ततो द्व्यणुकनाशः। १ त
तो द्व्यणुकनाशविशिष्टकालमपेक्ष्य विभागजपूर्वदेशविभागः २ ततः पूर्वदेशसंयोगनाशः ३ तत उत्तरदेश
संयोगः ४ ततः परमाणुकर्मनाशः ५ तदनंतरमदृष्टवशात्संयोगात्तत्रैव परमाणौ द्व्यारंभानुगुणा क्रिया
६ ततो विभागः ७ ततः पूर्वसंयोगनाशः ८ ततो द्व्यारंभकसंयोगः ९ ततो द्व्यणुकोत्पत्तिः १० अथ रक्तरूपा

श्री०
८
४

प्रत्याम्नीरिति॥११ एकादशक्षणाः। एतावत्तिस्वःप्रक्रियापत्तमे स्तनुविधानेन दर्शिताः। विस्तरतस्तु विभागजविभागस्तु
त्पादनावसरे दर्शयिष्यामः॥ ननु पुनरस्मादग्निसंयोगाद् अणौ सान्निध्यरिति भाष्यमनुपपन्नं। कस्यैवाग्निसंयो
गस्य एवं रूपादिनाशकत्वाग्निमरूपाद्युत्पादकत्वसंभवात् मध्यमस्यावयविनि चेन्न। चिरांतरितोत्सारविनाशस्थ
ले परमाण्वंतरे वा पिठरे वा एवं रूपादिविनाशोत्तररूपोत्सारयोर्भिन्नकारणकतादर्शनेन विवादाध्यासितस्थ
लेपि तथैवानुमानात् तथा च प्रयोगः। परमाणोरक्तरूपं तत्पूर्वरूपनाशकाग्निसंयोगभिन्नाग्निसंयोगजन्यं
पार्थिवरूपत्वात्। चिरांतरितसंपत्तिपन्नेत्तसरमाणुरूपवत्। यद्वा। विवादाध्यासितो रूपविनाशोत्सादा भि
न्नासाधारणकारणको रूपोत्सारविनाशत्वात्। पिठररूपविनाशोत्सारवत्। रूपासमवायिकारणं। नरूपध्वं
सजनकं। रूपासमवायिकारणत्वान्मनवत्। विपक्षे निरुपाधित्वभंगः प्रसंगः॥ परमाण्वंतरनिष्ठकर्मविंमा
यां तु पंचमे षष्ठे सप्तमे ष्टमे नवमे दशमे वा क्षणे गुणोत्पत्तिः। तथाहि। एकत्र परमाणौ कर्म। ततो विभागः राम० ८

ततआरंभकसंयोगनाशक्षणएवापरत्रपरमाणौकर्म। ततआरंभकसंयोगनाशात् द्व्यणुकनाशः
परमाण्वंतरकर्मणा च विभाग इत्येकः क्षणः १ ततः केवलेपरमाणौ श्यामादिध्वंसो विभागाच्च पूर्वसं
योगनाश इत्येकः क्षणः २ ततो रक्ताद्युत्पत्तिः द्व्यारंभकसंयोगश्चेत्येकः क्षणः ३। ततो द्व्यणुकोत्पत्तिः
४ अथ तत्र रक्ताद्युत्पत्तिरिति ५ पंच क्षणाः॥ द्व्यणुविनाशसमकालं परमाण्वंतरे कर्मचिंतनायां षट् क्ष
णाः॥ तथाहि। परमाणुकर्मणा परमाण्वंतराद्विभागः। ततो द्व्यारंभकसंयोगनाशः। अथ द्व्यणुकना
शः अस्मिन्नेव क्षणे परमाण्वंतरे कर्म। १ ततः श्यामादिनिवृत्तिः क्षणएव परमाण्वंतरकर्मणा विभागः
२ ततो रक्ताद्युत्पत्तिः क्षणएव परमाण्वंतरे पूर्वसंयोगनाशः। ३ ततः परमाण्वंतरसंयोगः ४ ततो द्व्यणुको
त्पत्तिः ५। अथ रक्ताद्युत्पत्तिरिति ६ षट् क्षणाः। श्यामादिविनाशसमकालं परमाण्वंतरे कर्मचिंतनायां स
प्तक्षणाः। तथाहि। पूर्ववद्व्यापेन द्व्यणुकनाशानंतरं १ श्यामादिनिवृत्तिरेतस्मिन्नेव क्षणे परमाण्वंतरे कर्म

श्री॰ ततो विभागः ३ ततः पूर्वसंयोगनाशः ४ ततउत्तरसंयोगः ५ अथ द्व्यणुके ६ अथ तत्र गुणोत्पत्तिरिति ७ समक्षणाः
८ रक्ताद्युत्पत्तिसमकालं परमाण्वंतरे कर्मचिंतनादष्टक्षणा। रक्ताद्युत्पत्त्यनंतरं कर्मचिंतनान्नवक्षणा। अपं
५ च सर्वैपि प्रकारा द्व्यणुकनाशानंतरं द्व्यणुकोत्पत्तौ। परत्र द्व्यणुकनाशसमकालमेव द्व्यणुकांतरोत्पत्तिस्त
राहि त्रिचतुःक्षणापि।। तथाहि। एकत्र परमाणौ द्व्यणुकनाशानुगुणक्रियासमकालमपरमाणौ विभा
गत्रितन्नान्नहिक्षणा। एकत्र परमाणौ द्रव्यविनाशानुगुणकर्मत्त एवापरमाणौ द्रव्यारंभानुगुणकर्मचिं
तनात्रिक्षणा।। द्रव्यविरोधिविभागसमकालं परमाण्वंतरे कर्मचिंतनाच्चतुःक्षणेति। पीलुपाकवि
चारप्रयोजनं तु पार्थिवावयविविशेषगुणानोपाकजद्रव्यभावित्वेसति अपाकद्रव्यभावितान् शब्दवत्।
अपाकजद्रव्यभावित्वं च समानाधिकरणाध्वंसप्रतियोगित्वं।। अथ संख्या।। एकमात्रवृत्तिपत्तित्वेस राम
ति एयत्वान्यानेकवृत्तित्वेद्वित्वादिगुणत्वव्याप्यजातिमत्वं संख्यात्वं। व्यासज्यवृत्तिपत्तित्वेसत्यव्यासज्यवृत्तित्व ९

त्रिवृत्त्यक्षान्यगुणत्वव्याप्यजातिमत्त्वं वा। सा च एकत्वादिपरार्धपर्यन्ता। तत्रैकत्वं नित्यसङ्ख्येषु नित्यं अनित्येषु कार
णगुणपूर्वकं। द्वित्वादीनां तु अपेक्षाबुद्धिर्निमित्तकारणं समानाधिकरणमेकत्वमसमवायिकारणं। सम
वाय्यसमवायिनिमित्तानां साम्येऽपि द्वित्वत्रित्वादिवैचित्र्यं कथमिति चेत्। नाशगभावभेदेनात द्वैचित्र्यसंभ
वात् पाकजरूपरसादिवैचित्र्यवत्। एतदामुक्ष्याः पेक्षाबुद्ध्या द्वित्वं। द्वित्वसहितया त्रित्वमित्यादि बोध्यं॥
गुरुत्वं चैकत्वान्यसंख्याः विषयत्वापन्नुद्वाभ्यामेकत्वाभ्यां द्वित्वं। त्रिभिस्त्रित्वमित्यादीति। तत्राएकत्वादि
त्वाभावात्॥ द्वाभ्यां द्वाभ्यां द्वित्वमिति चेत्। द्वित्वोत्पत्तेः पूर्वं द्वयोत्पन्नभावात्। भावे वा द्वित्वांतरं वे पथ्यो
रिति दिक्। ननु हेतुमेत्रीणि द्रव्याणीति संख्याविशिष्टप्रमसप्रक्षणा एव विशेषणस्य द्वित्वादेर्नाशाद्विशि
ष्टप्रत्यक्षानुपपत्तिरिति चेन्न। प्रागभावादिवत्स्वरूपवर्तित्वेन वकारणतोपपत्तेः॥ अथ परिमाणं
कालवृत्तित्ववृत्तित्वे सत्येकमात्रवृत्तिवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं परिमाणत्वं। कालस्थाने दिक्प्र

श्री॰ क्षेपोरा नचतुर्विधं। अणुत्वं महत्त्वं ह्रस्वत्वं दीर्घत्वं चा। तत्र परमाणुत्वं परमाणुवृत्ति। तद्द्वेवपारिमांडल्यं। तत्समाना
१० धिकरणं च परमह्रस्वत्वं। अवांतराणुत्वं द्व्यणुकमात्रवृत्ति। अवांतरह्रस्वत्वमपि तथा॥ अणुकमारभ्य नग
10 सागरपर्यंतं अवांतरमहत्त्वं अवांतरदीर्घत्वं च॥ आकाशादिविभुषु परममहत्त्वं परमदीर्घत्वं च। एवं च सर्वमेव
द्रव्यं परिमाणद्वययोगि। वर्तुलचतुरस्रादयस्तु महत्त्वविशेषाः। वंशापेक्षया समिदादिषु ह्रस्वत्वव्यवहा
रः। कुवलापेक्षया आमलकादिषु अणुत्वव्यवहारश्च भाक्तः। भक्तिश्च प्रकर्षाभावः। परमाणुत्वपरमह
त्वे स्वसमानाधिकरणपरिमाणभिन्ने। परिमाणत्वात् अवांतरमहत्त्ववदित्यनुमानात् परमदीर्घत्वपरमह
त्त्वसिद्धिः॥ अनित्यमहत्त्वं तु संख्यापरिमाणप्रचययोनि। तत्र त्रसरेणुमहत्त्वं द्व्यणुकापेक्षया बहुत्वजन्यं द्व्य
णुकनिष्ठबहुत्वयोनि। तूलादिपरिमाणं प्रचययोनि॥ दृ तंतुकपालाद्विंतंतुकमहत्त्वोत्कर्षदर्शनात्तस राम
रिमाणं बहुत्वयोनि। द्व्यणुकपरिमाणं तु द्वित्वयोनि॥ ह्रस्वत्वमप्येवं। कार्यभेदश्च आगमभावभेदात्। एवं म १०

ह्रस्वदीर्घत्वयोरपि। यात्रिमाऽल्पत्वं च न कारणानां नित्यपरिमाणत्वात्सरमम हत्वत्॥ अथ पृथक्त्वं॥ अवधित्वं प
लेख्यति एकमात्रवृत्ति वृत्सने कत्वन्निष्ट त्रिगुणात्वव्याप्यजातिमत्त्वं पृथक्त्वं। इदमस्मात्पृथगिति प्रत्ययासिद्धं॥ इ
दमिदं न भवतीत्यन्योन्याभावप्रतीतेस्तु हिलक्षणत्वात्॥ पञ्चम्योगे पृथक्त्वाविनाभिन्नरभिन्नादीनां समभि
व्याहारे अन्यारादितरर्ते इति सूत्रविहिता पञ्चमी। नञ्प्रयोगे तु प्रथमेति वैलक्षण्यात्॥ न चैवं धर्ममेव पृथ
क्त्वं॥ यथा माऽज्ञो विधूर्मो न त्वपृथक्॥ इति प्रतीतेः। रूपरसादेः पृथगित्याद्यव्यवहारो गौणः। अन्योन्याभावव
त्त्वेव चगुणयोगः प्रतीतिस्तरोपरूपाम्महानुपारद्दिति त॥ न च एकत्ववदेकपृथक्त्वमपि कारणगुणपू
र्वकमाश्रयनाशनाश्यमेकद्रव्यविश्रान्तं चाहित्वाद्विहि पृथक्त्वाद्यपेक्षाबुद्धिजन्यं तन्नाशनाश्यं व्यास
ज्यवृत्ति च॥ ननु द्वित्वसमानाधिकरण्यं पृथक्त्वाभ्यां द्वौ पृथगिति प्रतीतिरस्ति। द्वौ पीतावितिवदिति चेन्न
मसेकविश्रान्तपृथक्त्वयोरन्योन्याभावघटितया चेत्तन्मेत्र पृथगिति वत्तृ चैत्रान्मैत्राच्चैत्रमैत्रौ पृथगिति प्रती

श्री०
११

सापत्तेः द्वित्वस्य सा द्रव्यत्वकालजातेरवान्तरजातिर्न वर्तते। प्रतीतिवैलक्षण्यं तु द्वित्वादिघटितमेवेति यद्यपि भाष्य
स्वरसस्तथापि द्वित्वस्यावान्तरजातिर्वर्तत एव। द्वित्वादिजातिः परं न वर्तते तत्र द्वित्वादिकं तु द्वित्वादिगुणा
धीनैवेत्याचार्याः॥ अथ संयोगः॥ विभागभिन्नत्वे सति अनेकवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिम
त्त्वं संयोगत्वं॥ द्रव्यासमवायिकारणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं वा। पार्थिवपरमाणुरूपासम
वायिकारणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं वा। एवं रसादिस्पर्शेनापि द्रष्टव्यं। त्रिविधश्चायं॥ अ
न्यतरकर्मजोभयकर्मजसंयोगजभेदात्। द्वयोर्व्याप्यवृत्तिश्चायं ह्यव्याप्यवृत्तिर्वा। आधेयता
निरूपणां परं किंचिदवयवावच्छेदेन। विभुनोर्जोपि संयोग इति केचित् तन्न प्रमाणाभावात्॥ अथ वि
भागः॥ स्वजनककर्मोत्तरधिकरणक्षणाव्यवहितोत्तरोत्सन्निकवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं विभाग
त्वं॥ द्रव्यासमवायिकारणवृत्तिकर्मात्रवृत्तवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं वा। संयोगाद्रूपवृत्तिः संयोग

ताम
११

पुंसएवविभागः।अन्यथाविभागस्यक्षणद्वयमात्रावस्थायित्वादुपगमाद्युत्तरकालंविभक्तप्रत्ययोनस्यादितिचेन्न
धरासदोर्विभक्तइतिसावधिकत्वप्रतीतेः।दिग्विशेषस्तूपलक्षणतयाभाने।हिमवद्विन्ध्यौविभक्तावितिप्रतीत्यारो
पपत्तेः।सोयंत्रिविधः।अन्यतरकर्मजउभयकर्मजःविभागजश्चेति।विभागजोद्विविधःकारणमात्रविभागजः
कारणाकारणविभागजश्च।तत्राद्योवंशेपाट्यमानेदलद्वयविभागाद्दलाकाशविभागः।दलकर्मतएवकिंनस्या
दितिचेन्नतस्यद्रव्यारम्भकसंयोगविरोधिविभागजनकतयानन्तरविरोधिविभागजननासामर्थ्यात्।—साङ्कुः।द्विती
यस्तुहस्तनगविभागात्कायतरुविभागः।दलद्वयविभागःकारणद्वयवर्तिसंयोगनाशंद्रव्यनाशंवापेक्ष्य
कार्याकारिविभागंजनयति।निरपेक्षस्यजनकत्वेकर्मत्वापत्तेः।इतिभाष्योक्तविकल्पार्थइतिकेचिदूचुः।द्रव्य
नाशविशिष्टएवजनकइतितुकिरणावलीकृतः।सर्वेषांविभागानांसमानाधिकरणसंयोगद्वयनाशः
अपरत्वापरत्वे॥कालपिण्डसंयोगासमवायिकारणकत्वमपरत्वमेकमात्रवृत्तिर्गुणःकालिक

श्री॰ परत्वं गमसंद्रविषयकापेक्षाबुद्धिजन्यत्वे सति अपरत्वभिन्नत्वं वा परत्वापरत्वनाशस्तु क्वचिदपेक्षाबुद्धिनाशात् १ क्वचि
१२ द्समवायिकारणसंयोगनाशात् । २ क्वचिदाश्रयनाशात् ३ क्वचिदाश्रयनाशसंयोगनाशाभ्यां । ४ क्वचिदपेक्षा
बुद्धिनाशसंयोगनाशाभ्यां ५ क्वचिदाश्रयनाशापेक्षाबुद्धिनाशाभ्यां ६ क्वचित्सर्वनाशेभ्य इति ७ सप्तधा ॥
12 अथ बुद्धिः ॥ इच्छासाक्षात्कारणात्मविशेषगुणत्वम् आत्माश्रयाव्याप्यजातिमत्त्वं बुद्धित्वं । सा च द्वेधा । विद्या चाविद्या
च । यद्वा विशेष्ये यस्य यः संबंधो यदवच्छेदेन वर्तते तेन हि तदवच्छेदेन तच्च विशेष्ये तस्य विशेषणस्य तत्त्वं
वंधावगाहिज्ञानं विद्या । अस्यास्तु विद्या चतुर्विधा । प्रत्यक्षलैंगिकस्मृत्यार्षभेदात् । तत्रेंद्रियत्वेनेंद्रियजन्यं
ज्ञानं प्रत्यक्षं । ज्ञानाकरणकं ज्ञानं वा । साक्षात्प्रमितिपद्द्वार इन्द्रियत्वं च स्मृत्यजनकज्ञानजनकमनःसं
योगाश्रयत्वं वा । इन्द्रियाणि च षट् । घ्राणरसनचक्षुःश्रोत्रत्वङ्मनोभेदात् । तत्प्रत्यासत्तिर्द्वेधा लौकिकु राम॰
लौ । किकी चालौकिकी षोढा । संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायो १२

विशेषणता चेति। विशेषणतापि शुद्धा संबंधांतरगर्भा चेति द्वेधा। अभावप्रत्यक्षे हेतुः। इत एव घटाद्यभावग्रहः। अलौकि
कं त्रेधा। सामान्यज्ञानं योगजधर्मश्चेति। किंचित्सामान्यं विशेषणता विशेषएव। ज्ञानमपि संयुक्तसमवेतेन विशेषणाने
वसाहः। मनःसंयुक्तात्मसमवेतेन ज्ञानाविशेषणेन यथाहि परमाणुर्भासते परमाणुमहं जानामीति। प्रत्यक्षं च द्विविधं स
विकल्पकं निर्विकल्पकं च। आद्यं वैशिष्ट्यविषयकं। निष्प्रकारकमपरं॥ अथ लैंगिकं॥ तत्र व्याप्तः पक्षधर्मो लिं
गं। तत्परामर्शजन्यं ज्ञानं लैंगिकं॥ हेत्वाभासास्तु विरुद्धासिद्धसंदिग्धास्त्रय एव। बाधायामपि पक्षधर्मो हेतुरनैकां
तिको वा। सत्प्रतिपक्षस्थलेपि विरुद्धयोरन्यतरस्मिन् व्याप्तिपक्षधर्मतान्यतरभंग आवश्यक एव। अतो बाधस
त्प्रतिपक्षौ न पृथक्। अप्रयोजकस्य व्याप्यत्वासिद्ध एव। शब्दोपमाने इति। अर्थापत्तिसंभवाभावचेष्टालिपी
नामपि प्रत्यक्षाद्यन्यतमेंतर्भावः॥ अथाविद्या॥ सा च संशयविपर्ययस्वप्नानध्यवसायभेदाच्चतुर्धा॥
संशयो द्विविधः। साधारणधर्मदर्शनजो विप्रतिपत्तिजश्च। असाधारणधर्मजस्तु न संशयः किंत्वनध्यवसा

यः। कथं तर्हि संशयोऽनिसः। आवृत्त्या हि सूसाधारणा इति चेन्न। अनध्यवसायफलकमपि तत्त्वानिसश्चयफलकत्व
१३ मात्रेण संशयस्य लक्षसाधारण्येन गणितमपि सेवेति। अत एवानध्यवसितं हेत्वाभासांतरमिति रिक्तो लावती कृतः।
13 संशयत्वं जातिरेव मानसत्वव्याप्येति केचित्। साचायं विशेषदर्शनचलो न्यायप्रसंगा यद्यपि यादृनोतिश्चयत्वंत
वेद्याम अस्त्येव्यूवात थाप्यनु विधेयगतस्य संशयस्य विचारांगत्वं। विचारसाध्यो निर्णयो विना चि एव संश
यो गम्यते व चाविचारांगं। अतो लिंगपरामर्शी हि नासंशयनाशोप्यदोषः॥ अथ विपर्ययः संज्ञायानध्यस्य सा
प भिन्नस्से सति जागराचस्व मिथ्याज्ञानं विपर्ययः॥ स चान्यथाख्यातिरूपः अयथत्वम सचमिश्रोपस्तुतं तःकर
णजं ज्ञानं। मिथ्या च निद्रा। यद्वाहि स्वप्नवहनाडीमध्यवर्तिमनः स्वहावाहिरिंद्रियसंबंधविरहात् स्वप्नज्ञानान्येवाजाय
ते। तत्रापि त्वगिंद्रियसंबंधविरहे सुषुप्तिः। तदुक्तं॥ यदा त्वचमपि प्राप्तिस्तत्र मनः पुरीततिवर्ते तेन तदा सुषुप्तिरिति।
अनध्यवसायस्तु किं स्विदिदमिति ज्ञानं॥ नत्विदं संशय एवाकोटयनुल्लेखात्। साधारणधर्मविमतेण त्रिभ्यां जनि राम॰
तत्वात्। न चासाधारणधर्मोपि संशयजनकः। अननुभूतकमेलकोहि किंस्विदिदमिति सन्ध्यवसितो भवति। न १३

तुरगोयंमतंगजोवेतिसंदिग्धे। नचावर्तकस्पर्शादिग्रीवत्वलंबोष्ठत्वादेर्दर्शनात्। जिज्ञासाजन्यकत्वं तु निश्चयभिन्न
त्वे सतितेन। तच्च संशयानध्यवसायसाधारणमेव ॥ अथ सुखं धर्ममात्रासाधारणकारणकात्मगुणः सुखं। तच्चेंद्रिया
र्थसंनिकर्षजन्यं॥ स्रगाद्यभिमतविषयोपलब्धिसकलव्यापारः। उत्सवमात्रवेद्यं। तच्चतुर्विधं। वैषयिकं मानो
रथिकमाभ्यासिकमाभिमानिकं च। वैषयिकस्रक्कारणसुक्तं। अनागतविषयस्मरणान्मानोरथिकं। वैरुध्याघ
विद्यमानधर्मारोपादाभिमानिकं। आभ्यासिकं तु द्वारमृगयाद्यनुस्तेवनादिजन्यशरीरलाघववशाद्भ्यासादिज्ञा
नजन्यं॥ सुखंज्ञानेमे वेत्ति चेत्न॥ अहं सुखीतिविचित्रप्रसंगात्॥ अथ दुःखं॥ अधर्मासाधारणकारणकात्म
गुणो दुःखं॥ अथेच्छा॥ द्वेषप्रयत्नेसतिप्रयत्नासाधारणकारणात्मविशेषगुणवृत्तिगुणत्वव्याप्यजातिमत्तं
त्वमिच्छा। सा च सुखेतरोपाधिः तत्साधनेच्छागारो नरोपाधिकी। सा चानेकप्रकारा। कामोभिलाषः संकल्पो रागः
कारुण्यं वैराग्यं कपटं भावः स्पृहा तृष्णा लोभः कार्पण्यं इत्यादिभेदात्। सा च प्रयत्नं साक्षात् जनयति। धर्माध
र्मौ च प्रयत्नद्वारा। क्वचित्साक्षादपि। भवति हि गंगास्नानाभिलाषमात्राद्धर्मः। परदाराभिलाषमात्राच्चाधर्मः॥ अथ द्वे

षः इच्छान्मते स्वनिष्ठयत्नसाक्षात्कारगामित्वविशेषगुणत्वं द्वेषत्वं। स च दुःखत्वजन्यः। दुःखं च दुःखवत्साधनानुस्मरणाद्भ
वति। स्वकीयश्च स प्रत्यक्षः। परकीयश्च चक्षुरागकरणाद्यनुमेयः। स च बहुप्रभेदः। द्रोहः क्रोधो मन्युरक्षमामर्ष ईर्ष्या असूया
चेति भेदात्। स च निवृत्तिलक्षणप्रयत्नजनकः। शत्रुवधो रोगशान्तिस्तरणसाधनताज्ञानादेवा। परंतु द्वेषोपि भयानुया
यी सन्नेवेतत्॥ अथ प्रयत्नः स द्विविधः जीवनयोनिरितरश्च। तत्राद्यः सुषुप्तस्य प्राणापानप्रेरकः धर्माधर्मोपग्र
परे तु कः अतीन्द्रियः। न च तत्रोरेवेति न्यायेनादृष्टादेव प्रेरणमस्तीति चेन्न। जाग्रद्दशायां प्राणक्रियायाः प्रयत्नपूर्वकत्व
दर्शनात्। इतरस्तु इच्छापूर्वको द्वेषपूर्वकश्च हिताहितप्राप्तिपरिहारफलिकां शरीरस्य चेष्टाक्रियां प्रति हेतुः। प्र
यत्नवदात्मसंयोगासमवायिकारणिका हि क्रिया चेष्टा॥ अथ गुरुत्वं। तच्च पतनासमवायिकारणवृत्तिगुण
त्वव्याप्यजातिमत्। लौकिकसाक्षात्काराविषयमूर्तगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमद्वा। पतनं चाद्यः सं
योगफलकः क्रियाविशेषः। धूमेनास्तीति चेन्न। अस्त्येव धूमरश्मावयवानां गुरुत्वापकर्षात्तदूर्ध्वगमनं तु
खे वङ्गिपवनाभ्यां नोदनाभिघाताभ्यां। अत एव प्रणाड्यां वेल्लनोर्ध्वगमनवचनात्तच्चासीदिदं। कथं तर्हि हस्तेनोन्नीय

मानस्यगुरुत्वमतीतिरितिचेत् । हस्तावनमनेनतदनुमानात् । अधोभागावच्छेदेनस्पार्शनंतदितिलीलावतीकृतः

अवयविनिगुरुताधिक्यमस्त्येव । अवनमनविशेषानुपलंभस्तु कस्मात्तरोन्मानकालेतत्रगुरुत्वानुभवेभावदिसु

क्तं ।। तेनवपतनेजननीयेसंयोगप्रयत्नसंस्काराः प्रतिबंधकाः ।। तथाहि । दोलीरूढस्यसंयोगेनप्रतिबंधादपतनं

। विधारकप्रयत्नेनप्रतिबंधाच्छरीरस्य । वेगेनप्रतिबंधात्स्वशिसवारादेः । तच्चपरमाणौनित्यं । अन्यदवयविनिकारण

गुणपूर्वकं अथद्रवत्वं ।। तद्द्विविधं ।। सांसिद्धिकंनैमित्तिकंच । आद्यंजलएवपरमाणौनित्यं । अन्यत्रकारण

गुणपूर्वकं । द्वितीयंपृथिवीतेजसोः । तेजःसंयोगासमवायिकारणकं । तैलक्षीरादावुपष्टंभकजलगतंत्वे

डोलकघोरहनानुकूलं । नैमित्तिकद्रवत्वोत्पत्तिः पाकजरूपाद्युत्पत्तिवत् । हिमकरकादिकंतुशीतस्पर्शवत्वात्तज

लमेव । काठिन्यंतुसांसिद्धिकद्रवत्वस्येगरहेनप्रतिबंधात् । हिमकरकादिविलयनमपिघृतविलयनवदेव ।

अथस्नेहः ।। रसवन्मात्रवृत्तिनिरतिगंधवद्वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वंस्नेहत्वं ।। सचजलमात्रवृत्तिः

परमाणौनित्यः । अन्यत्रकारणगुणपूर्वकः । संग्रहमृजाहेतुः । संग्रहः सक्तुसिकतादीनांपिंडीभावप्रयोजकः

१५ संयोगविशेषः। मृजा चोद्वर्तनादिसाध्या शरीरशुद्धिः। घनीभूतपरमाणुकजलगतः स्नेहः। द्रवत्वं तु न जलगतं नैमित्ति
15 कत्वात्॥ अथ संस्कारः॥ मूर्तामूर्तवृत्तिः शक्तिकार्यस्मरणहेतुर्गुणस्तत्साक्षाद्व्याप्यजातिमत्त्वं संस्कारत्वं। स त्रिविधः
वेगो भावना स्थितिस्थापकश्च॥ तत्र वेगो मूर्तेष्वेव पंचसु। कर्मसमवायिकारणकः। क्वचित्कारणगुणपूर्वकः।
कस्पर्शवद्द्रव्यसंयोगविनाश्यः असंक्षः। वेगेन गच्छतीति प्रतीतेः॥ तस्य च तीव्रत्वमंदत्वाभ्यां तज्जन्यकर्मणोपि तीव्र
त्वमंदत्वे। यद्यपि सर्वेषां कर्मणां उत्तरसंयोगात्प्राक् विभाजकत्वमविशिष्टं तथापि तीव्रकर्म अधिकदेशावच्छेदे
न संयोगं जनयति। मंदं त्वल्पदेशावच्छेदेनेति युगपत्क्षिप्तयोरपि शरयोर्न युगपत्पातः। तत्र तीव्रो वेगः स्पर्शवद्द्र
व्यसंयोगविशेषनाश्यः। मंदस्तु स्पर्शवद्द्रव्यसंयोगनाश्यः। स वायपि एक एव शरादौ यावत्पातमनुवर्तत इति वैशे
षिकाः। अन्ये तु संतानक्रमेण कर्मणा वेगः पुनर्वेगे कर्मेति वदंति। अथ भावना आत्मविशेषगुणः अनुभव
जन्यः स्मृतिप्रत्यभिज्ञानजनकः विरोधिज्ञाननिवर्त्यः॥ क्वचिद्भ्रमणनिवर्त्यः। मत्तानां पूर्वसंस्कारविलोपदर्शनात्। क्व राम
चिच्च तीव्रदुःखनिवर्त्यः। पटुतराभ्यासादरप्रत्ययाधीनः। स च सदृशदर्शनादिनोद्बुद्धः स्मृतिं जनयति॥ स्थितिस्थापक १५

त्कस्पर्शवद्वेगवद्द्रव्येषुवर्त्तते। सचातीन्द्रियः। स्वाश्रयस्पन्दनिमित्तः पूर्वावस्थापत्त्यानुमीयते।। परमाणुषुनित्यः। का
र्यद्रव्येषु कारणगुणपूर्वकः। क्रियासंतानविशेषासमवायिकारणं। स्पर्शवन्मात्रवृत्तिवृत्तिसंस्कारत्वव्याप्यजातिमं
स्थितस्थापकत्वं।। अथ धर्मः।। सुखजनकवृत्त्यतीन्द्रियात्मविशेषगुणमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं ध
र्मत्वं।। यागादेस्तज्जनकत्वाद्धर्मत्वव्यपदेशः। चिरध्वस्तस्य कालांतरभाविफलजनकत्वान्यथानुपपत्त्या कल्प्यः। फ
लजनकत्वं च दृष्टसाधनतावच्छिन्नमिति गम्यते।। सकर्तृगत इत्युत्सर्गः। जातेष्ट्यादौ तु भोक्तृगतः। स चांत्यसुख
ज्ञाननाश्यः। प्रधानापूर्वानुसन्निष्ठलीयांगापूर्वाणां तु न तत्तानाश्याः। क्वचित्कीर्तनादिनापि नाशः।। अथा
धर्मः। दुःखजनकवृत्तिप्रत्यक्षात्मगुणमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमान्। सच स्वजनितास्वदुःखप्रत्यक्षवि
रोधी। प्रायश्चित्तादिनाश्यः। सा विहिताननुष्ठाननिषिद्धानुष्ठानाभ्यां जन्यः।। अथ शब्दः ज्ञानासमानाधिकरणा
विभुविशेषगुणो वा। आकाशविशेषगुणो वा।। श्रोत्रमात्रग्राह्यजातिमान्वा शब्दः। द्विविधश्च सः। वर्णात्मको ध्व

न्यात्मकश्चात्तत्रस्मृसयेच्छाद्यात्ममनःसंयोगाद्वर्णोच्चारणेच्छा ततः प्रयत्नवदात्मसंयोगात् कोष्ठस्थवायोः कर्म ततो र्ध्वंग
१६ 16 च्छन्वायुः कंठताल्वादीनभिहंति ततः कंठवाय्वभिघातान्निमित्तात् कंठाकाशसंयोगादसमवायिकारणादकुह
विसर्जनीयानां निष्पत्तिः एवं वायुतालुसंयोगान्निमित्तात्ताल्वाकाशसंयोगादसमवायिकारणात् इचुयशानामु
त्पत्तिरित्याद्यूह्यं । ध्वनीनां तु भेरीवायुसंयोगान्निमित्तात् भेर्याकाशसंयोगादसमवायिकारणादुत्पत्तिः एवं वं
शाकाशविभागादपि ध्वन्युत्पत्तिः । द्वितीयादिशब्दास्तु शब्दजाः । शब्दे नश्वरत्वं तदनंतरजननं ध्रौव्यं कथं संतानोच्छेद इति
चेत् शब्दनिमित्तकारणीभूतस्य वायोः यावदूर्ध्वं गच्छतः क्वचिद्भित्तिप्रतिबंधात्तत्क्रियानाशात्तदनिग्रहाणा । श्रो
पमनीयो यमिति व्यवहारस्तु जातिविशेषेण तत्र देशीयशंखादिप्रभवत्वानुमानात् । जातिविशेषास्तु गत्वादिव्याप्या
स्तारत्वादिरूपाः एवं च तत्राद्यमध्यमाः कार्यनाश्याः अंत्यस्तु कारण — शब्दः क्षणिकश्च ॥ इति गुणपदार्थः अथ क
र्माणि तत्त्वानित्यमात्रवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्वं कर्मत्वं विभागासमवायिकारणमात्रवृत्तिसारिवा । वि राम
भागस्थाने संयोगो वा न च बहिरिन्द्रियग्राह्य मूर्तमात्रवृत्ति संयोगवेगप्रयत्नगुरुत्वद्रवत्वासमवायिकारणकं । छिनत्सु १६

पकारासमवायिकारणकं चात्वजन्यसंयोगनाश्यं संयोगविभागयोरनपेक्षकारणं। स्वोत्तरभाविभावभूतकारणानपेक्षत्व
मनपेक्षत्वशब्दार्थः। नच स्वकार्यं प्रति नो सघते। उत्पन्नेन हि संयोगविभागो जननीयो तौ च यद्येकद्विक्षणे तस्यैकेनैवोपपन्नौ। द्वि
तीयमप्रमाणकं। परस्परविरुद्धयोरुत्तरदेशोः संयोगविभागौ अन्योन्यप्रतिबंधादेव जनयितुमशक्तौ॥ कर्मत्वसाक्षाद्व्या
प्यजातयः पंच उत्क्षेपणत्वमवक्षेपणत्वमाकुंचनत्वं प्रसारणत्वं गमनत्वं चेति। हश्यने हि हस्तादिषु क्षिप्यमाणेषू
र्ध्वदेशावच्छेदेन संयोगजनकत्वमुपलभ्य महस्तमुत्क्षिपतीति प्रसयः। अधोदेशावच्छेदेन संयोगजनकत्वमुपलभ्य मह
स्तमवक्षिपतीति प्रसयः। एवं कर्मगुरुत्वस्य वस्त्रादेरवयवानामान्योन्याभिमुख्येनालोकादिदेशैः संयोगमुपलभ्य वस्त्र
माकुंचतीति व्यवहारः। एवं तदैव पूर्वसंयोगविपरीतसंयोगमुपलभ्य वस्त्रं प्रसरतीति प्रसयः। एवमनियतदिग्दे
शसंयोगविभागवस्तु गच्छतीति प्रसयः। उत्क्षिप्यमाणे ऊर्ध्वं गच्छतीति प्रयोगः कथमिति चेत्। विशेषे शक्तस्य सा
मान्ये लक्षणयेति गृहाण। भ्रमणरेचननिष्क्रमणप्रवेशनपतनत्वादयो न जातयः संकरप्रसंगात्। इति कर्मपदा
र्थः॥ अथ सामान्यं   तच्च नित्यत्वे सत्यनेकसमवेतं। अनेकवृत्तिगुणावृत्तिवृत्तिपदार्थविभाजकोपाधिमत्त्वं सामान्य

त्वं।समवायसंबंधेनानेकवृत्तित्वंसामान्यंतरस्याक्षेपकंप्रतिक्षेपकंचातत्त्वपरमपरंचेतिद्विविधं।परंसत्ता।द्रव्यत्वाद्यपरं।त
१७ द्व्योग्यव्यक्तिवृत्तियोग्यं॥ब्राह्मणत्वपद्मरागत्वान्यपरेत्वासहकर्मेंद्रियग्राह्यं॥रातारत्वादित्वविधिनिरूप्यमपि।परमाणु
17 षु चरमलघ्वायेवौवजातिर्नतुपृथिवीत्वादिप्याप्यादघितादिः॥ इतिसामान्यपदार्थः॥ नित्यमात्रवृत्तिवृत्तिपदा
र्थविभाजकोपाधिमानविशेषः।नित्यसमवेतमात्रवृत्तिपदार्थविभाजकोपाधिमान्वा।समवेतातीन्द्रियमात्रवृ
त्तीसादृश्यवा।एकव्यक्तिसमवेतत्वेसतिसत्तासाक्षाद्व्याप्योवानित्यद्रव्यमात्रवृत्तिः।नव्यावर्तकतयाकल्प्यः।स्वतएवव्यावृत्तः॥
इतिविशेषपदार्थः।स्वाश्रयप्रतियोगिकान्योन्याभावासमानाधिकरणाभावविभाजकोपाधिमान्समवायः।गुणागुण्या
दिविशिष्टप्रत्ययकल्प्यः।नित्योतीन्द्रियएकश्च।विशिष्टबुद्धिविषयोपितत्रियामकः।अहश्शरीरीसारादावदृष्टवत्।भाव
मात्रधर्मः।अभावविशिष्टधीस्तुस्वरूपसंबंधाधीना इतिसमवायः अथाभावः सद्विविधः।संसर्गाभावोन्यो
भा२ न्याभावश्च।आद्यस्त्रेधा।प्रागभावप्रध्वंसाभावात्यंताभावभेदात्।उत्पादविनाशशीलत्वेपिसंसर्गाभावइतिकेचि राम
त्।अत्यंताभावान्योन्याभावौद्विधा।सामान्याभावविशेषाभावभेदात्॥इत्थंभावःसप्तानामपिसाधर्म्यमप्रमेयत्वाभिधे १७

यत्नादिविषस्यांभावत्वं समवायभिन्नानांपंचानांसम्बन्धाप्रत्ययत्वं । चतुर्णांलौकिकप्रत्यक्षविषयभावविभाजको
१८ 18 पाधिमत्वं । त्रयाणांजातसाश्रयता । सत्ताश्रयनिष्ठवृत्तिभावविभाजकोपाधिमत्वंद्वयोः । एकसगुणाश्रयत्वेसाधूत्वं
इतिश्रीकणादरहस्यसंग्रहेसाधर्म्यनिरूपणं ॥ समाप्तश्चायंग्रन्थः ॥ छ छ छ छ

राम १८

न्याय

३८